Sem III

28

SYBA 15/11/17 10 to 1 Pages 3

**Q.P. Code : 22203**

**( 3 Hours )** **[ Total Marks : 100**

**N.B. :** (1) **All** questions are **compulsory**.
(2) **All** questions carry **equal marks**.
(3) **Figures** to the right **indicate marks** to a **sub-questions**.

1. केवलं द्वौ समूहौ अनुवदत । **10**

A) i) रदनिका : एहि वत्स ! शकटिकया क्रीडावः ।
दारक : (सकरुणम्) रदनिके, किं मम एतया मृत्तिकाशकटिकया ? तामेव सौवर्णशकटिकां देहि ।
रदनिका : (सनिर्वेदं निश्वस्य) जात, कुतोऽस्माकं सुवर्णव्यवहारः ? तातस्य पुनरपि ऋदध्या सुवर्णशकटिकया क्रीडिष्यसि । तदयावद्विनोदयाम्यहम् । आर्यवसन्तसेनायाः समीपमुपसर्पिणष्यामि आर्ये, प्रणमामि ।
वसन्तसेना : रदनिके, स्वागतं ते । कस्य पुनरयं दारकः ? अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम् ।

ii) निवर्तेतास्य यावद्भिरितिकर्तव्यता नृभिः ।
तावतोऽतन्द्रितान्दक्षान्प्रकुर्वीत विचक्षणान् ।।
तेषामर्थे नियुञ्जीत शूरान्दक्षान्कुलोद्‌गतान् ।
शुचीनाकरकर्मान्ते भीरुनन्तर्निवेशने ।।

B) i) अस्ति पूर्वापरजलनिधिवेलावलग्ना मध्यदेशालङ्कारभूता मेखलेव भुवः वेत्रलताशतदुष्प्रवेशा, क्रूरसत्त्वापि मुनिजनसेविता कात्यायनीव प्रचलित-खड्गभीषणा रक्तचन्दनालंकृता, प्रावृडिव घनश्याम-लोकशतहृदालंकृता, गिरितनयेव स्थाणुसंगता, मृगपतिसेविता नारायणमूर्तिरिव तमालनीला पार्थपताकेववानरक्रान्ता, जानकीव प्रसूतकुशलवा निशाचर परिगृहीता, विराटनगरीव कीचकशतावृता विन्धाटवी नाम । **10**

ii) तस्य मध्ये सुपर्याप्तं कारयेद्गृहमात्मनः ।
गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमान्वितम् ।।
तदध्यास्योद्वहेद्भार्यां सवर्णां लक्षणान्विताम् ।
कुलेमहति संभूता हृद्यां रूपगुणान्विताम् ।।

**TURN OVER**

**Q.P. Code : 22203**



C) i) अनतिदूरवर्तिनि तपोवने प्रतिवसन् कोऽपि मुनिकुमारः तमपश्यत । जाबालमुनेः हारितनामा तनयः सः समुपजातदयः तं गृहीत्वा तपोवनमगच्छत् । सरस्तीरं नीत्वा अङ्गुल्या तस्य चञ्चुपुटे कतिचित् जलबिन्दून् अपातयत् । अम्भःसेकं कृत्वा नवसंजीवनं व्यतरत । सहाध्यायिभ्यः चावदत्, ''अयं तु शुकशिशुः दूरनिपातन विह्वलतनुः आतपक्लान्तः च । अक्षमोऽयमुत्पतितुम् । अत्रैव तपोवनतरुकोटरे तिष्ठतु । **10**

ii) प्रवहणाधिरुढश्चेट : (प्रविश्य) रदनिके, रदनिके, निवेदय आर्यायै वसन्तसेनायै – अपवारितं पक्षद्वारके सज्जं प्रवहनं तिष्ठति ।

रदनिका : (प्रविश्य) आर्ये, एष वर्धमानको विज्ञापयति पक्षद्वारे सज्जं प्रवहणम् इति ।

वसन्तसेना : हञ्जे, तिष्ठतु मुहूर्तकम् । यावदहमात्मानं प्रसाधयामि ।

रदनिका : वर्धमानक, तिष्ठ मुहूर्तकम्, यावदार्या आत्मानं प्रसाधयति ।

चेट : ही ही भोः । मयापि यानास्तरणं विस्मृतं तद, यावत् गृहीत्वा आगच्छामि एते नस्य– रज्जु–कटुका बलीवर्दाः भवतु, प्रवहणेनैव गतागतिं करिष्यामि ।

2. केवलं द्वौ परिच्छेदौ लिखत ।

A) दुर्गवैशिष्ट्यानि । **10**

B) विवाहसंस्कारः । **10**

C) आयुर्वेदः । **10**

3. केवलं द्वौ उत्तरत ।

A) ससन्दर्भं स्पष्टीकुरुत । **10**

(i) दूतस्तत्कुरुते कर्म भिद्यन्ते येन वा न वा ।

(ii) कोटरात् भूमौ शुष्कपर्णराशेरुपरि पतितः ।

B) ससन्दर्भं स्पष्टीकुरुत । **10**

(i) अनाथ परिपालनं हि खलु धर्मः ।

(ii) द्वावेव पूजनीयौ अत्र नगर्यां तिलकभूतौ च ।

C) खगोलशास्त्रविषये निबन्धं लिखत । **10**

**TURN OVER**

**Q.P. Code : 22203**



4. केवलं द्वौ उत्तरत । **10**

A) रिक्तस्थानानि पूरयत ।

(i) अरे वीरक, मया ----- प्रलोकितं पुनरपि त्वं प्रलोकयसि ।

(ii) अम्भःसेकं कृत्वा ----- व्यतरत ।

(iii) तदेषा तवैव कण्ठाभरणं भवतु ----- ।

(iv) ----- दण्ड आयत्तो दण्डे वैनयिकी क्रिया ।

(v) प्राप्ते च राजकार्ये ----- अहं न जानामि ।

(रत्नावली, नवसंजीवनं, अमात्ये, पितरमपि, चन्दनकेन)

**10**

B) संस्कृतेन उत्तरत ।

(i) सचिवस्य त्रीणि विशेषणानि लिखत ।

(ii) मृच्छकटिकस्य नायकः कः ?

(iii) मानवाः कः भिद्यन्ते ?

(iv) कः जाबालमुनेः पुत्रः ?

(v) कः रोहसेनः ?

**10**

C) युग्मानि योजयत ।

| | |
|---|---|
| (i) पुष्पकरण्डकं | (i) आत्मगतम् |
| (ii) रदनिका | (ii) दूतः |
| (iii) दारकः | (iii) पार्वती |
| (iv) स्वगतम् | (iv) जीर्णोद्यानम् |
| (v) वाग्मी | (v) पुत्रः |
| | (vi) दासी |

**10**

5. टिप्पणीं लिखत **(केवलं द्वे)** :

A) (i) कर्णाटकलहः । (ii) आर्यकः ।

B) (i) अर्थकामौ । (ii) समावर्तनम् ।

C) (i) राजभार्या । (ii) षाड्गुण्यम् ।

---